Original Article
ISSN (Online): 2582-7472

ShodhKosh: Journal of Visual and Performing Arts
January-June 2024 5(1), 3389–3401

# A REVIEW OF THE MORPHOLOGICAL MEANINGS OF THE WORD 'RIVER' READ IN NIGHANTU

# निघण्टौ प्रयुक्तानां नदीवाचकशब्दानां रूपतत्त्वार्थसमीक्षणम्

Munmun Misra [1], Laxminarayan Pandey [2]

[1] Department of Sanskrit, Mansarovar Global University, Sehore, M.P., India

**DOI**
10.29121/shodhkosh.v5.i1.2024.6085

**Funding:** This research received no specific grant from any funding agency in the public, commercial, or not-for-profit sectors.

**Copyright:** © 2024 The Author(s). This work is licensed under a Creative Commons Attribution 4.0 International License.

With the license CC-BY, authors retain the copyright, allowing anyone to download, reuse, re-print, modify, distribute, and/or copy their contribution. The work must be properly attributed to its author.

OPEN ACCESS

## ABSTRACT

**English:** The Vedas are a vast and pure array of words and are the fruit of the truth experienced by the Indian intellectuals who have realized the religious principles of spirituality The Vedas are the root of all religion. That Veda, which consists of mantras and Brahmanas, is not only revered in Indian literature, but also shines in the sky of world literature, shining with its own unparalleled image. The text which teaches the worldly means of attaining the desired and avoiding the undesired is the Veda, according to the commentator on the Vedas, Sainacharya. The Vedas, the oldest texts in world literature, reveal the means of attaining both worldly and spiritual welfare, religion and the giver of its fruits. The oldest form and development of human culture can be determined by examining the Vedas. India's great reputation in the entire world is based on the Vedas. The history of the human race and the nature of modern linguistics are examined through the study of the Vedas. It is also true that the mystery of the Vedas is the fundamental study, criticism and contemplation of the six limbs of teaching and other parts of the Vedas

**Hindi:** साक्षात्कृतधर्मैर्भारतीयमणीषाभिरध्यात्मशास्त्रानुभूततत्त्वस्य फलं खलु विशालो विमलः शब्दराजिर्वेदः । वेदोऽखिलो धर्ममूलम् । मन्त्रब्राह्मणात्मकः सः वेदो न केवलं भारतीयवाङ्मयेष्वेव समादृतः, अपि तु विश्वसाहित्याकाशेऽपि स्वकीयया अप्रतिमप्रतिभया देदीप्यमानः सन् राराजते । इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः इति वेदभाष्यकार-सायणाचार्यराद्धान्तः । विश्वसाहित्ये सर्वतः प्राचीनतमो ग्रन्थः वेद एव ऐहिकामुष्मिकोभयविधश्रेयःसाधनस्य धर्मस्य तत्फलं दातुरीश्वरस्य च प्रकाशकः । मानवसंस्कृतेः प्राचीनतमं स्वरूपं विकासश्च वेदस्य परिशीलनेनैव निश्चेतुं शक्यते । समस्तेऽपि जगतीतले भारतस्य महती प्रतिष्ठा वेदमाश्रित्यैवास्ति । मानवजातेरितिवृत्तस्य आधुनिकभाषाविज्ञानस्य च स्वरूपं वेदाध्ययनेनैव परिशील्यते । इदमपि सत्यमतिरोहितमेवास्ति यद् शिक्षादिषडङ्गानां तथा षड्वेदाङ्गानां मौलिकानुशीलनं, पर्यालोचनं, मननं चान्तरेण वेदानां रहस्यं

**Keywords:** Concise Summary, Introduction, Meaning of The Word Nighantu, River Words in The Nighantu, Review of The Morphological Meaning of River Words Used in The Nighantu, Conclusion, List of Abbreviations, Bibliography संक्षिप्तसारः, अवतरणिका, निघण्टु-शब्दस्यार्थः, निघण्टुस्थिताः नदीवाचकशब्दाः, निघण्टौ प्रयुक्तानां नदीवाचकशब्दानां रूपतत्त्वार्थसमीक्षणम्, उपसंहारः, शब्दसंक्षेपसूची, ग्रन्थपञ्जी

## 1. प्रस्तावना

संस्कृतसाहित्ये तथा विश्वसाहित्ये वेदाः खलु केयूरायन्ते । विद्यन्ते धर्मादयः पुरुषार्था यस्मिन् ते वेदाः, इति बह्वृच्प्रातिशाख्यमतम् । सायणाचार्यस्त्वपौरुषेयं वाक्यं वेद इत्याह । यो ग्रन्थो वेदयति इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं स वेद इति ऋग्वेदभाष्यभूमिकायामुक्तम् । अपि वा प्रत्यक्षानुमानागोचरं ज्ञानमनेनैवावगम्यत इति कृत्वास्याखिलशास्त्रमूलत्वमभ्युपगम्यते । मन्त्रब्राह्मणारण्यकोपनिषद्भेदेनायं चतुर्विधः । संहितापि चतुर्विधा ऋग्यजुःसामाथर्वभेदेन । वेदानां गूढार्थत्वात्तद्बोधनाय वेदार्थकुशलैराचार्यैर्वेदार्थेभ्यो निकृष्य सुबोधानि शिक्षादीनि षड् वेदाङ्गानि प्रवर्तितानि विद्यास्थानत्वेन । प्रधानञ्चेदं वेदाङ्गम् । इतरेभ्योऽङ्गेभ्यः सर्वशास्त्रेभ्यश्चार्थपरित्रानाभिनिवेशात् । शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति षडङ्गेष्वेतेषु निरुक्तं नाम ह्येकं वेदाङ्गम् । महर्षिपाणिनिना स्वशिक्षायां यथोक्तम् –

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते । ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ।।

शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् । तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ।।[1] इति ।

षड्वेदाङ्गेषु निरुक्तं नाम यत्र निर्वचनविधया तत्तदर्थबोधनाय पदजातं निरुच्यते निःशेषेणोपदिश्यते । भगवता यास्केन नैघण्टुक-नैगम-दैवतकाण्डरूपेण त्रिविधं काण्डं समाम्नातम् । तेषु त्रिविधेषु काण्डेषु निघण्टुस्थितस्य नदीवाचकशब्दानां रूपतत्त्वार्थसमीक्षणमेव गवेषणापत्रस्यास्य मुख्यविषयः ।

## 2. निघण्टु-शब्दस्यार्थ

षड्वेदाङ्गेषु निरुक्तं नाम यत्र निर्वचनविधया तत्तदर्थबोधनाय पदजातं निरुच्यते निःशेषेणोपदिश्यते । भगवता यास्केन नैघण्टुक-नैगम-दैवतकाण्डरूपेण त्रिविधं काण्डं समाम्नातम् । निघण्टुस्तु वैदिककोषाभिधानपरो ग्रन्थः । कोषशब्देन शब्दराशिस्तथा शब्दसमष्टिरवगम्यते । गवादेर्देवपत्न्यन्तरेकचत्वारिंशच्छतत्रयाधिकसहस्रशब्दराशिरिह निघण्टुग्रन्थे विधृतः । तेन हि बोध्यते निघण्टुस्तावद्विशालः कोषग्रन्थः । अत्र खलु वैदिकशब्दानां समाम्नायो दृश्यते । स च शब्दाराशिः ***सम्-सम्यक् आ-मर्यादया पारिपाट्या वा म्नायते आम्नायतेऽभ्यस्यत*** इति व्युत्पत्त्याभिधीयते समाम्नायशब्देन । अत एव तस्य गवादेः शब्दसमूहस्य ग्रन्थाकारेण पूर्वाचार्यैः पठिततया प्रसिद्धमभिधानं निघण्टुवाख्यया ।[2] एवञ्च मन्त्रार्थपरिज्ञानाय सोदाहरणं पञ्चाध्यायशास्त्रसंग्रहभावेन ऋषिभिरेकस्मिन्नाम्नाये शब्दराशेर्विधृतत्वात् सिद्धमिदं निघण्ट्वभिधानम् ।[3] प्रसङ्गेऽस्मिन् नाट्यशास्त्रे उक्तं तत्रभवता ग्रन्थकारेण –

नानानामाश्रयोत्पन्नं निघण्टुं निगमान्वितम् । धात्वर्थहेतुसंयुक्तं नानासिद्धान्तसाधितम् ।।

स्थापितोऽत्र भवेद्यत्र समासेनार्थसूचकः । धात्वर्थवचनेनेह निरुक्तं तत्प्रचक्षते ।। [4] इति ।

निघण्टुविधृतशब्दानामर्थपिरतुबोधे सम्भवति मन्त्रार्थावगमः । वेदेभ्यः समाहृतानां तेषां हि शब्दानां समाम्नायेनार्थज्ञानप्रतिपत्तेर्मन्त्रार्थप्रतिबद्धत्वाद् अर्थज्ञानसम्पादनेन निगमादुपपन्नं निघण्टुत्वम् । निपूर्वाद् गमेरौणादिकेन तुन्प्रत्ययेन पृषोदरादित्वाद् गकारतकारयोर्घकारटकारत्वापत्तेः सिद्धं तदेव पदाभिधानम् । निश्ययेन (अर्थान्) गमयन्तीति (नि-गम् तुः=) निगन्तुः । उच्यते – ***निगमनान्निघण्टव उच्यत इत्यौपमन्यवः***[5] इति ।

पुनश्च, प्रकारान्तरेणापि[6] भवितुमर्हति निघण्टुशब्दस्य व्युत्पत्तिः । आहननं वचनं पाठः । *सूत्रे इदमाहतम्, ब्राह्मणे इदमाहतम्* इत्यादौ पाठार्थतया आङ्पूर्वाद्धन्तेः प्रयोगस्य दर्शनात्तस्मादेव धातोः पदस्योपपत्तेर्वर्णागमविपर्ययादिनियमप्रतिपत्त्या प्रसिद्धं निघण्टुत्वम्, तेषां शब्दानामेकत्र पाठात् । अपि वा समाहृताः[7] सन्तोऽपि एते शब्दाः निघण्टव उच्यन्ते सम् आ इत्येतयोरुपसर्गयोः स्थाने नि इत्युपसर्गाध्याहारेण हरतेर्हकारर्कारयोः घण्त्वापत्त्या उणादिकेन तुन्प्रत्ययेन वर्णाविकारात्तकारस्य टत्वेन नित्त्वात् टुवर्णावशेषेण निघण्टुशब्दोपपत्तेः। यद्वा, निपूर्वाद् चुरादिगणे घटिधातोरपि शब्दोऽयं निष्पद्यते । तथा हि निर्वचनसमूहद्वारेण सम्भवति शब्दार्थप्रतिबोधः । प्रत्यक्ष-परोक्षातिपरोक्षवृत्तित्रयभेदेन शब्दस्य व्युत्पत्तेः सम्भवात् खल्वाकृतिवैचित्र्येण प्रतिपद्यते शब्दार्थज्ञानं गवादिशब्दार्थप्रतिबोधद्वारेण निगमान्निगन्तुत्वेन निघण्ट्वभिधानाधिगमात् । ग्रन्थस्यास्याध्यायपञ्चकत्वा-त् प्रत्यध्यायमपि तदाख्यया अभिव्यक्तेः तमिमं समाम्नायं निघण्टव इत्याचक्षते इत्येवं सङ्गतम् । नाम-आख्यात-निपात-उपसर्गैश्चतुर्भिः पदजातैर्ग्रन्थस्यास्य निघण्ट्वाख्यस्य स्वरूपं निर्णीतं निरुक्तकृद्यास्काचार्येण ।[8] तत्रास्मिन् ग्रन्थे बह्वर्थवाचका एकशब्दा एकार्थवाचकाश्च नैकविधाः शब्दा उपलभ्यन्ते । गवादिदेवपत्न्यन्तेषु शब्देषु तेषामुपग्रहो भवतीति दृश्यते ।

## 3. निघण्टुस्थिताः नदीवाचकशब्दाः

निघण्टौ तत्र सप्तत्रिंशन्नदीनामानि सन्ति । तान्येव - अवनयः, यह्व्यः, स्वाः, सीराः, स्रोत्याः, एन्यः, धुनयः, रुजानाः, वक्षणाः, स्वादो अर्णाः, रोधचक्राः, हरितः, सरितः, अग्रुवः, नभन्वः, वध्वः, हिरण्यवर्णाः, रोहितः, सस्रुतः, अर्णाः, सिन्धवः, कुल्याः, वर्यः, उर्व्यः, इरावत्यः, पावत्यः, स्रवन्त्यः, ऊर्जस्वत्यः, पयस्वत्यः, सरस्वत्यः, तरस्वत्यः, हरस्वत्यः, रोधस्वत्यः, भास्वत्यः, अजिराः, मातरः, नद्यः इति ।

निघण्टौ प्रयुक्तानां नदीवाचकशब्दानां रूपतत्त्वार्थसमीक्षणम् -

निघण्टूक्तेषु नदीवाचकेषु अवनय एव प्रथमपदम् ।[9] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं –

[1] पा.शि. – 41-42
[2] तमिमं समाम्नायं निघण्टव इत्याचक्षते (नि. – 1.1.1.3)
[3] निघण्टवः कस्मात्, निगमा इमे भवन्ति (नि. – 1.1.1.4)
[4] नाट्य. – 6.12-13
[5] नि. – 1.1.1.5
[6] अपि वाहननादेव स्युः, समाहता भवन्ति (नि. – 1.1.1.6)
[7] यद्वा समाहृताः भवन्ति (नि. – 1.1.1.7)
[8] तद्यान्येतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च तानीमानि भवन्ति (नि. – 1.1.1.8)
[9] निघ. – 1.13.1

रूपार्थसमीक्षणम् – धातुपाठे भ्वादिगणे विविधार्थकबोधकेन अव-धातुना[10] सह औणादिकेन अनि-प्रत्यययोगेन[11] अवनि-पदं निष्पद्यते । तस्य बहुवचने अवनयः-इति सिद्धम् ।

तत्त्वार्थसमीक्षणम् - अवन्ति रक्षन्ति जीवान्, वृक्षादीन्, मनुष्यान् इति अवनयः ।[12] नद्यः स्वोदकेन जगत् अवन्ति रक्षन्ति । अपि च, जनाः तीरादिनिर्माणेन ताः नदीः अवन्ति रक्षन्ति[13] इति कृत्वा अवनयः-इति पदेन नद्यः इत्यवगम्यन्ते ।

यह्व्यः - निघण्टूक्तेषु नदीवाचकेषु यह्वय एव द्वितीयपदम् ।[14] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं -

रूपार्थसमीक्षणम् – धातुपाठे अदादिगणे गमनार्थकेन या-धातुना[15] सह निपातनात् अ-प्रत्यययोगेन, धातोर्ह्रस्वे, हुगागमे,[16] ङीप्प्रत्यययोगेन च यह्वी-इति रूपं निष्पन्नम् । बहुवचने यह्व्यः इति रूपं सिद्धम् । अपि च, द्विधातुजं वा इदं नाम – यातश्च हूतश्च हवतीति । यातेर्ह्वयतेश्च *गेहे कः* इति सूत्रेण[17] बाहुलकाद्धूते कप्रत्ययो ह्वयतेःसम्प्रसारणाभावश्च ।

तत्त्वार्थसमीक्षणम् - नद्यः तान् तान् प्रदेशान् गच्छन्ति । अपि च, प्राणिभिः ताः प्राप्यन्ते ।[18] यद्वा, यह्व्यो नाम महत्यो नद्यः । द्विधातुजत्वात् ताः नद्यः याताश्च प्राणिभिः हुताश्च यज्ञेषु इति ।

स्वाः - निघण्टूक्तनदीवाचकेषु स्वा एव तृतीयपदम् ।[19] शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं -

रूपार्थसमीक्षणम् – धातुपाठे भ्वादिगणे शब्दार्थकेन स्वन्-धातुना[20] सह ड-प्रत्यययोगेन[21], स्त्रीलिङ्गे टाप्-प्रत्यययोगेन च स्वा-इति पदं निष्पन्नं जातम्।

तत्त्वार्थसमीक्षणम् – प्रवाहकाले नद्यः गर्जयन्ति शब्दयन्ति इति कृत्वा तत्र स्वाः-इति पदेन नद्यः इत्यवगम्यन्ते ।

सीराः - निघण्टूक्तेषु नदीवाचकेषु सीरा एव चतुर्थपदम् ।[22] इदानीं शब्दस्यास्य रूप-तत्त्वार्थसमीक्षणं -

रूपार्थसमीक्षणम् – धातुपाठे स्वादिगणे क्र्यादिगणे च बन्धनवाचकेन सि-धातुना सह[23] क्रन्-प्रत्यययोगेन[24] सीर-इति पदं निष्पन्नं जातम् । क्रन्-प्रत्ययस्य र-इत्यवशिष्यते ।

तत्त्वार्थसमीक्षणम् – नद्यः सेत्वादिभिः शिलादिभिर्वा वध्यन्ते इति कृत्वा तासां नदीनां सीरास्त्वमिति प्रतिपादितम् ।

स्रोत्याः - निघण्टूक्तेषु नदीवाचकेषु स्रोत्या एव पञ्चमपदम् ।[25] इदानीं शब्दस्यास्य रूपतत्त्वार्थसमीक्षणं -

रूपार्थसमीक्षणम् – स्रवतीति विग्रहे गत्यर्थकेन स्रु-धातुना[26] सहौणादिकेन असुन्-प्रत्यययोगेन, तुडागमेन[27] च स्रोत-इति पदं निष्पन्नं जातम् । स्रोतोऽम्बुसरणं स्वतः इति अमरकोशः ।[28] वेगेन जलवहनं स्रोत इति । स्वतः स्वयम् अम्बुनः सरणं गमनं स्रोतः इत्यन्वयः । स्रोत-शब्दस्यार्थस्तु नदी इति गीतायामुक्तम् ।[29] इदानीं, *स्रोतसि भवाः* इति विग्रहे *स्रोतसो विभाषा ड्यड्ड्यौ*-इति सूत्रेण[30] *ड्यत्*-प्रत्यये कृते सति स्रोत्य-इति पदं निष्पन्नं जातम् । तस्य पदस्य बहुवचने स्रोत्याः – इति पदं सिद्धम् ।

तत्त्वार्थसमीक्षणम् - स्रोतो नाम वेगेन जलवहनम् । तत्र भवाः स्थिताः स्रोत्याः नद्यः । अपि च, स्रोतोऽनुसरणाद्धि नद्यो भवन्ति । यतो हि, स्वतः स्वयम् अम्बुनः सरणं गमनं स्रोतः इति । स्रोतसि भवाः, तस्यानुसरणकारिण्यश्चेति कृत्वा स्रोत्याः –इति शब्देन नद्य इत्यवगम्यन्ते ।

---

[10] अव रक्षणगतिकान्तिप्रीति... – भ्वा.पर.धा.पा. - 600
[11] अर्तिसृधृधम्य... (उ.- 2.102) 259
[12] दे.य. – अवति प्रजाः... (निघ. – 1.1.9)
[13] दे.य. – अवन्ति जगत् स्वोदकेन, अव्यन्ते प्राणिभिस्तीरादिनिर्माणेन ... (निघ. – 1.13.1)
[14] निघ. – 1.13.2
[15] या प्रापणे – अ.पर.धा.पा. - 1049
[16] शेवयह्व... (उ. – 1.152) 152
[17] पा. – 3.1.144
[18] निघ. – 1.13.2 (दे.य.)
[19] निघ. – 1.13.3
[20] स्वन् शब्दे – भ्वा.पर.धा.पा. - 827
[21] अन्येष्वपि दृश्यते (पा. – 3.2.101)
[22] निघ. – 1.13.4
[23] षिञ् बन्धने - स्वा/क्र्या.उ.धा.पा. - 1248/1477
[24] शुसिचिमीनां दीर्घश्च (उ. – 2.26) 183
[25] निघ. – 1.13.5
[26] स्रु गतौ – भ्वा.पर.धा.पा. - 940
[27] स्रुरीभ्यां तुट् च (उ. – 4.201) 641
[28] अम. – 1.2.56
[29] झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी (गी. – 10.31)
[30] निघ. – 4.4.113

एन्यः - निघण्टूक्तेषु नदीवाचकेषु एन्य एव षष्ठपदम् ।[31] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

रूपार्थसमीक्षणम् – धातुपाठे अदादिगणे गत्यर्थकेन इ-धातुना[32] सह औणादिकेनासुन्[33]-प्रत्यययोगेन, *कृदिकारात्*-इति वार्तिकेन[34] ङीष्-प्रत्यययोगे एनी, तस्य बहुवचने एन्य-इति पदं निष्पन्नं जातम् ।

तत्त्वार्थसमीक्षणम् – नदीनां गमनशीलत्वं प्रसिद्धं सुविदितञ्च । वस्तुतः गमनमेव नदीनां स्वाभाविकधर्मः । अत एव यन्ति एभ्यः गमनस्वभावा हि नद्यः गम्यन्ते वा प्राणिभिः इति कृत्वा नदीनां एन्यस्त्वं प्रतिपादितम् ।

धुनयः - निघण्टूक्तेषु नदीवाचकेषु धुनय एव सप्तमपदम् ।[35] इदानीं शब्दस्यास्य रूपतत्त्वार्थसमीक्षणं -

रूपार्थसमीक्षणम् – धातुपाठे स्वादिगणे कम्पनार्थकेन धु-धातुना[36] सह औणादिकेन नि-प्रत्यययोगेन[37] धुनि-इति पदं निष्पन्नं जातम् । तस्य बहुवचने धुनय इति रूपं सिद्धम् ।

तत्त्वार्थसमीक्षणम् – नद्यः सवेगं प्रवाहकाले नदीतीराणि वृक्षादीनि च धुन्वन्ति कम्पयन्ति, कम्पन्ते वा स्वयं गमनशीलत्वात्[38] इति कृत्वा धुनय एव नदीपदवाच्यम्

रुजानाः - निघण्टूक्तेषु नदीवाचकेषु रुजाना एव अष्टमपदम् ।[39] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

रूपार्थसमीक्षणम् – धातुपाठे तुदातिगणे दुःखप्रदानार्थकेन रुज्-धातुना[40] सह व्यत्ययेन शानच्-प्रत्ययो भवति । तुदादिभ्यः शः – इति श-विकरणः, छान्दसः नुमभाव इति कृत्वा रुजानः, बहुवचने रुजानाः – इति पदं निष्पन्नं जातम् ।

तत्त्वार्थसमीक्षणम् – वर्षासु अधिकजलप्रवाहत्वेन नद्यः स्वकूलानि रुजन्ति ध्वंसं कुर्वन्तीति कृत्वा नद्यः तानि कूलानि प्रति दुःखदायकाः भवन्ति । देवयज्वा अपि उवाच – *रुजन्ति कूलानि*[41] इति । ऋग्वेदभाष्यकारेण सायणाचार्येणापि आम्नातम्[42] – *रुजन्ति कूलानीति रुजानाः नद्यः । रुजाना नद्यो भवन्ति रुजन्ति कूलानि (नि. – 6.4) इति यास्कः* इति ।

वक्षणाः – निघण्टूक्तेषु नदीवाचकेषु वक्षणा एव नवमपदम् ।[43] इदानीं शब्दस्यास्य रूपतत्त्वार्थसमीक्षणं -

रूपार्थसमीक्षणम् – धातुपाठे भ्वादिगणे रोषवाचकार्थकेन वक्ष्-धातुना[44] सह युच्-प्रत्यययोगेन,[45] च्-इत्यस्य इत्,[46] यु-स्थाने अनः,[47] णत्वहेतु[48] वक्षणः, बहुवचने वक्षणाः इति सिद्धम्

तत्त्वार्थसमीक्षणम् - वर्षासु नद्यः वेगेन प्रवहति, वृक्षलतागुल्मादीन् नदीतीरान् च हिंसन्ति इति कृत्वा तासां रोषं प्रकाशयन्ति । यद्वा वक्षतिः प्राप्तिकर्मणः स्यात् – इति माधवः ।[49] तत्रापि युच्-प्रत्ययो भवति । अर्थस्तु प्राणिभिः ताः प्राप्यन्ते । अपि च, ताः स्वयमेव समुद्रं निम्नप्रदेशं वा प्राप्नुवन्ति इति । रोषप्रकाशनार्थं प्राप्तिकर्मार्थं च तासां नदीनां वक्षणास्त्वम् इति प्रतिपादितम् ।

स्वादो अर्णाः - निघण्टूक्तेषु नदीवाचकेषु स्वादो अर्णा एव दशमपदम् ।[50] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

---

31 निघ. – 1.13.6
32 इण् गतौ – अदा.पर.धा.पा. - 1045
33 सर्वधातुभ्योऽसुन् (उ. – 4.188) 628
34 बह्वाऽदिभ्यश्च (पा. – 4.1.45)
35 निघ. – 1.13.7
36 धुञ् कम्पने – स्वा.उ.धा.पा. - 1255
37 घृणिपृश्निपार्ष्णि... (उ. – 4.52) 492
38 निघ. – 1.13.7 (दे.य.)
39 निघ. – 1.13.8
40 रुजो भङ्गे – तु.पर.धा.पा. - 1416
41 निघ. – 1.13.8
42 ऋ. – 1.32.6 (सा.भा.)
43 निघ. – 1.13.9
44 वक्ष रोषे संघाते च – भ्वा.पर.धा.पा. - 663
45 क्रुधमण्डार्थेभ्यश्च (पा. – 3.2.151)
46 युवोरनाकौ (पा. – 7.1.1)
47 हलन्त्यम् (पा. – 1.3.3), तस्य लोपः (पा. - 1.3.9)
48 रषाभ्यां नो णः समानपदे (पा. – 8.1.4)
49 निघ. – 1.13.9 (दे.य.)
50 निघ. – 1.13.10

रूपार्थसमीक्षणम् – धातुपाठे भ्वादिगणे आत्मनेपदीना आस्वादनार्थकेन स्वाद्-धातुना[51] सह असुन्-प्रत्यययोगेन[52] स्वाद-शब्दो निष्पद्यते । स्वादः भक्ष्यमाणः[53] इति

तत्त्वार्थसमीक्षणम् - भक्षणेन चात्र वाधनं लक्ष्यते, तेन कूलं वाधमानोऽर्णो जलं यासामिति स्वादो अर्णः, वेगवज्जलमित्यर्थः । स्वादो अर्णा जलान्विताः ।[54] स्वादो वेगवज्जलं यासां ताः भक्षितकूलोदकाः ।[55] स्वादुजलेन परिपूर्णत्वान्नद्याः स्वादो अर्णत्वं सिद्धम् ।

रोधचक्राः - निघण्टूक्तेषु नदीवाचकेषु रोधचक्रा एव एकादशतमपदम् ।[56] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः

रूपार्थसमीक्षणम् – धातुपाठे रुधादिगणे वाधाप्रदानार्थकेन रुध्-धातुना[57] सह घञ्-प्रत्यययोगेन रोध-शब्दो निष्पद्यते । क्रियतेऽनेनेति विग्रहे कृ-धातुना[58] सह घञर्थे क-प्रत्ययः, *कृञादीनां के द्वे भवतः* इति द्वित्वे कृते सति चक्र-इति पदं निष्पद्यते

तत्त्वार्थसमीक्षणम् – रोधः नदीतीरम् । चक्रं करणम् । रोधस्य निरोधस्य चक्रं करणं कृतिरासां विद्यते इति रोधचक्राः ।[59] नद्यः खलु वृष्ट्या बहूदकद्वारेण प्राणिनां गतिः निवारयन्ति, वाधाप्रदानं कुर्वन्ति इत्यर्थः । नदीतीरेण नद्यः जलप्रवाहमपि निवारयति । यद्वा, रोधः तीरं तस्य करणं निर्माणमासां विद्यते तीरवत्यो हि नद्यः । स्वतीरेण वाधाप्रदानाय रोधचक्राः इति शब्देन नदीत्यवगम्यते ।

हरितः - निघण्टूक्तेषु नदीवाचकेषु हरित एव द्वादशतमपदम् ।[60] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः

रूपार्थसमीक्षणम् – धातुपाठे भ्वादिगणे हरणार्थकेन हृ-धातुना[61] सह औणादिकेन इतन्-प्रत्यययोगेन[62] हरितः-इति शब्दो निष्पद्यते ।

तत्त्वार्थसमीक्षणम् - नदी स्ववेगेन प्रवाहकाले लतागुल्मवृक्षादीन् हरन्ति इति तस्याः नद्याः हरितत्वम् ।[63]

सरितः - निघण्टूक्तेषु नदीवाचकेषु सरित एव त्रयोदशतमपदम् ।[64] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

रूपार्थसमीक्षणम् – धातुपाठे भ्वादिगणे गत्यर्थकेन सृ-धातुना[65] सह औणादिकेन इतन्-प्रत्यययोगेन[66] सरितः-इति शब्दो निष्पद्यते ।

तत्त्वार्थसमीक्षणम् – स्रवन्ति गच्छन्ति इति सरितः । नदी सर्वदा प्रवहतीति अस्माभिर्ज्ञायते । सर्वदा गमनशीलत्वात् सरित-इति पदेन नदी इत्यवगम्यते।

अग्रुवः - निघण्टूक्तेषु नदीवाचकेषु अग्रुव एव चतुर्दशतमपदम् ।[67] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

रूपार्थसमीक्षणम् – धातुपाठे भ्वादिगणे गत्यर्थकात् अङ्-धातुना[68] सह रु-प्रत्ययान्तेषु[69] निपातितेषु द्रष्टव्योऽयं शब्दः । निपातनान्नलोपः । *तन्वादीनां छन्दसि बहुलम्* इति वार्तिकेण[70] उवङादेशे अग्रुव-इति पदं निष्पद्यते ।

तत्त्वार्थसमीक्षणम् – अग्रुवो गमनात् नद्यः इति माधवः ।[71] नद्यः गच्छन्ति तान् तान् प्रदेशान् स्ववेगेन इति कृत्वा गमनार्थकेन अङ्-धातोः निष्पन्नेन अग्रुव-इति शब्देन नदीवाचकत्वं प्रतिपादितम् ।

[51] स्वाद आस्वादने – भ्वा.आ.धा.पा. - 28
[52] सर्वधातुभ्योऽसुन् (उ. – 4.188) 628
[53] निघ. – 1.13.10 (दे.य.)
[54] निघ. – 1.13.10 (दे.य.)
[55] निघ. – 1.13.10 (दे.य.)
[56] निघ. – 1.13.11
[57] रुधिर् आवरणे – रु.उ.धा.पा. - 1438
[58] डुकृञ् करणे – त.उ.धा.पा. - 1472
[59] निघ. – 1.13.11
[60] निघ. – 1.13.12
[61] हृञ् हरणे – भ्वा.उ.धा.पा. - 899
[62] हृश्याभ्यामितन् (उ. – 3.93) 373
[63] दे.य. – हरन्ति वृक्षगुल्मादीनि वेगेन (निघ. – 1.13.12)
[64] निघ. – 1.13.13
[65] सृ गतौ – भ्वा.पर.धा.पा. - 935
[66] हृश्याभ्यामितन् (उ. – 3.93) 373
[67] निघ. – 1.13.14
[68] अहि गतौ – भ्वा.आ.धा.पा. - 635
[69] जत्र्वादयश्च (उ. – 4.102) 542
[70] छन्दस्युभयथा (पा. – 6.4.86)
[71] निघ. – 1.13.14 (दे.य.)

नभन्वः - निघण्टूक्तेषु नदीवाचकेषु नभन्व एव पञ्चदशतमपदम् ।[72] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः

रूपार्थसमीक्षणम् – धातुपाठे दिवादिगणे[73] क्र्यादिगणे[74] च ध्वंसार्थकेन तथा हिंसार्थकेन परस्मैपदीना नभ्-धातुना सह नु-प्रत्ययः[75], बाहुलकात् नुप्रत्यये नकार उपजनः । नभन्ते, नभ्यन्ति, नभ्नन्ति इति नभन्वः ।

तत्त्वार्थसमीक्षणम् - नद्यो हि बाधिकाः कुलादीनाम् । नद्यः सवेगं प्रवाहकाले यथा वृक्षलतागुल्मादीन् हरन्ति तथा हिंसन्ति, तथा नदीतीरमपि हिंसन्ति तथा ध्वंसं कुर्वन्ति । तदर्थं ध्वंसार्थकेन हिंसार्थकेन वा नभ्-धातोः निष्पन्नेन नभन्वः-इति शब्देन नद्यः इत्यवगम्यन्ते ।

वध्वः - निघण्टूक्तेषु नदीवाचकेषु वध्व एव षोडशतमपदम् ।[76] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

रूपार्थसमीक्षणम् – भ्वादिगणे प्रवाहार्थकेन वह्-धातुना[77] सह ऊ-प्रत्यययोगेन, ह-कारस्य ध-कारेण[78] वधू-इति पदं निष्पद्यते । बहुवचने वध्वः – इति रूपं निष्पन्नं जातम्

तत्त्वार्थसमीक्षणम् – वहन्ति संसारभारं उह्यते भर्त्रादिभिरिति वध्वः । अथवा नद्यः भूम्यां वहन्ति । अथवा नदी एव समुद्रस्य भार्या । उच्यते – सरित्पतिर्हि समुद्रः । समुद्रस्य भार्याहेतु नद्यो वध्व इत्युच्यन्ते ।

हिरण्यवर्णाः - निघण्टूक्तेषु नदीवाचकेषु हिरण्यवर्णा एव सप्तदशतमपदम् ।[79] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

रूपार्थसमीक्षणम् – हर्यति दीप्यते इति विग्रहे गत्यर्थकेन कान्त्यर्थकेन हर्य्-धातुना[80] सह कन्यन्-प्रत्ययेन धातोः हिरादेशे[81] च हिरण्य-इति रूपं सिद्धम् । भ्वादिगणे वरणार्थकेन वृञ्-धातुना[82] सह रन्-प्रत्यययोगेन[83] वर्ण-इति पदं निष्पद्यते ।

तत्त्वार्थसमीक्षणम् - वृणोति व्रियते वा असौ इति वर्णः श्वेतादि इति । हिरण्यः शुभ्र कान्त इष्टो वर्णो यासां ताः ।[84] अथवा हिताः निदाघे घर्मादौ रमणीयाः मनःप्रह्लादजनयित्र्यः ताः नद्यः । अपि च, तापादेर्भूम्या वारिकाश्च ता नद्यः ।[85] नदीनां जलं हिरण्यवच्छुभ्रं भवति । तेषामेव जलानां धारकाः नद्यः हिरण्यवर्णाः - इति शब्देन परिचीयन्ते इति तासां नदीनां हिरण्यवर्णत्वं निष्पादितम्

रोहितः - निघण्टूक्तेषु नदीवाचकेषु रोहित एव अष्टादशतमपदम् ।[86] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

रूपार्थसमीक्षणम् – धातुपाठे भ्वादिगणे बीजादुत्पादनार्थकेन रुह्-धातुना[87] सह औणादिकेन इति-प्रत्यय-योगेन,[88] रुह्-धातोः उकारस्य ओकारे सति रोहित-इति पदं निष्पन्नं जातम् ।

तत्त्वार्थसमीक्षणम् – नदीस्थितेन जलेन शस्यबीजानि फलबीजानि चेति प्ररोहन्ति, बीजाद्बहिर्निर्गच्छन्ति इति कृत्वा तस्यः रोहितस्य नदीवाचकत्वं प्रतिपादितम् । *रोहन्त्याभिर्बीजानि, तज्जलेन हि बीजानि प्ररोहन्ति*[89] इति ।

सस्रुतः - निघण्टूक्तेषु नदीवाचकेषु सस्रुत एव ऊनविंशतितमपदम् ।[90] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

---

72 निघ. – 1.13.15
73 णभ हिंसायाम् – दि.पर.धा.पा. - 1240
74 णभ हिंसायाम् – क्र्या.पर.धा.पा. - 1520
75 दाभाभ्यां नुः (उ. – 3.32) 312
76 निघ. – 1.13.16
77 वह प्रापणे – भ्वा.उ.धा.पा. - 1004
78 वहो धश्च (उ. – 1.83) 83
79 निघ. – 1.13.17
80 हर्य गतिकान्त्योः – भ्वा.पर.धा.पा. - 514
81 हर्यतेः कन्यन् हिर च (उ. - 5.44) 722
82 वृञ् वरणे – स्वा.उ.धा.पा. - 1254
83 ऋजेन्द्राग्रवज्रविप्र... (उ. – 2.29) 186
84 निघ. – 1.13.17 (दे.य.)
85 निघ. - 1.13.17 (दे.य.)
86 निघ. – 1.13.18
87 रुह बीजजन्मनि प्रादुर्भावे च – भ्वा.पर.धा.पा. - 859
88 हृसृरुहियुषिभ्य इतिः (उ. – 1.97) 97
89 दे.य. – 1.13.18
90 निघ. – 1.13.20

रूपार्थसमीक्षणम् - धातुपाठे भ्वादिगणे गत्यर्थकेन सम्पूर्वकात् स्रु-धातुना[91] सह क्विप्-प्रत्यययोगेन[92] च सस्रुत-इति पदं निष्पादितम् । सङ्गताः संमिलिताः इति सस्रुतः ।[93]

तत्त्वार्थसमीक्षणम् – क्षुद्रनद्यो महानद्यश्च परस्परं सङ्गताः संमिलिताः भवन्ति । अत एव सस्रुत इत्युच्यन्ते । यद्वा, स्रवणं स्रुतजलप्रवाहः स्रोत इत्यर्थः । स्रोतेण सह वर्तन्ते इति सस्रुतः । *सस्रुतः स्रोतसा युक्ताः* – इति च माधवः ।[94] अतएव संगतत्वात्, स्रोतेण सह वर्तमानत्वात् तासां नदीनां सस्रुतस्त्वम् ।

अर्णाः - निघण्टूक्तेषु नदीवाचकेषु अर्णा एव विंशतितमपदम् ।[95] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

रूपार्थसमीक्षणम् – धातुपाठे तनादिगणे गत्यर्थकेन उभयपदिना ऋण-धातुना[96] सह अच्-प्रत्यययोगेन[97] अर्ण-इति पदं निष्पन्नम् । अथवा ऋण-धातुना सह अच्-प्रत्यययोगेन, अर्तेः असुन्-प्रत्ययो[98] विहितो, बाहुलकात् नुडागमो च भवति इति कृत्वा अर्ण-इति पदं निष्पन्नं जातम् । बहुवचने अर्णाः – इत्येवं भवति ।

तत्त्वार्थसमीक्षणम् – अर्णन्ति गच्छन्ति इति अर्णाः ।[99] नदीनां सदा गमनशीलत्वं सर्वैरेव विज्ञायते इति कृत्वा अर्णाः-इति शब्दस्य नदीवाचकत्वं प्रतिपादितम् ।

सिन्धवः - निघण्टूक्तेषु नदीवाचकेषु सिन्धव एव एकविंशतितमपदम् ।[100] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः

रूपार्थसमीक्षणम् – धातुपाठे भ्वादिगणे निम्नप्रदेशे पतनार्थकेन क्षरणार्थकेन आत्मपदिना स्यन्द्-धातुना[101] सह उ-प्रत्यययोगेन[102], द-कारस्य धकारादेशेन च सिन्धु-इति पदं निष्पन्नं जातम् । स्त्रीलिङ्गवाचकेन शब्देनानेन नदविशेषः अवगम्यते । पदस्यैतस्य बहुवचने सिन्धवः – इत्येवं भवति ।

तत्त्वार्थसमीक्षणम् – नदी पर्तवात् प्रस्रवणरूपेण निम्ने पतति क्षरतीति कृत्वा तस्याः सिन्धुत्वं प्रतिपादितम् । स्यन्दन्ते इत्यर्थः इति देवयज्वा ।[103]

कुल्याः - निघण्टूक्तेषु नदीवाचकेषु कुल्या एव द्वाविंशतितमपदम् ।[104] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

रूपार्थसमीक्षणम् – धातुपाठे भ्वादिगणे संग्रहार्थकेन कुल्-धातुना[105] सह यत्-प्रत्यय-योगेन[106] कुल्य-इति पदं निष्पादितम् । कोलन्ति संस्त्यायन्ति अस्मिन् शिलादय इति कुलं पर्वतः ।

तत्त्वार्थसमीक्षणम् – कुलं नाम पर्तम इति सिद्धम् । तत्र कुले प्रधानभूते पर्वते भवाः स्थिताः इति कुल्याः ।[107] यद्वा मेघस्य पर्वतस्य वा समुच्छ्रिते प्रदेशे कुले भवन्तीति कुल्याः ।[108] अथवा अमरकोशानुसारेण कुल्या नाम कृत्रिमा नदीविशेषः ।[109] कुले प्राणिगणे साधुः *तत्र साधुः*-इति सूत्रेण[110] यत्-प्रत्ययेन कुल्या-इति पदं निष्पादितम् । अभिज्ञानशकुन्तलायामपि[111] कुल्या नाम कृत्रिमा नदीविशेषः तथा पयःप्रणाली इति । अत एव नदी-शब्दस्य कुल्यात्वं प्रतिपादितम् ।

91 स्रु गतौ – भ्वा.पर.धा.पा. - 940
92 क्विप् च (पा. - 3.2.76)
93 दे.य. – सस्रुतः सङ्गता इति माधवः (निघ. – 1.13.19)
94 निघ. – 1.13.19 (दे.य.)
95 निघ. – 1.13.20
96 ऋणु गतौ – तन.उ.धा.पा. - 1467
97 पा. – 3.1.134
98 उदके नुट् च (उ. – 4.196) 636
99 दे.य. – निघ.- 1.13.20
100 निघ. – 1.13.21
101 स्यन्दू प्रस्रवणे – भ्वा.आ.धा.पा. - 761
102 स्यन्देः सम्प्रसारणं धश्च (उ. – 1.11) 11
103 निघ. – 1.13.21 (दे.य.)
104 निघ. – 1.13.22
105 कुल संस्त्याने – भ्वा.पर.धा.पा. - 842
106 भवे छन्दसि (पा. – 4.4.110)
107 निघ. – 1.13.22 (दे.य.)
108 निघ. – 1.13.22 (दे.य.)
109 अम. – 1.10.34
110 पा. – 4.4.98
111 अ.शु. – कुल्याम्भोभिः पवनचपलैः शाखिनो धौतमूलाः (प्रथमाङ्कः)

<u>वर्यः</u> - निघण्टूक्तेषु नदीवाचकेषु वर्य एव त्रयोविंशतितमपदम् ।[112] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

<u>रूपार्थसमीक्षणम्</u> – धातुपाठे स्वादिगणीये वरणार्थकात् वृञ्-धातुना[113] सह इ-प्रत्यययोगेन[114] वर-इति निष्पादितम् । *कृदिकारात्*-इति वार्तिकेन[115] ङीष्-प्रत्यययोगे वरी-इति पदं निष्पन्नं जातम् । पदस्यैतस्य बहुवचने वर्यः-इत्येवं भवति । अथवा क्र्यादिगणीये सम्भजनार्थकेन सेवार्थकेन वृङ्-धातुना सह इ-प्रत्यययोगेनापि वर-इति पदं निष्पादितम् । *कृदिकारात्*-इति वार्तिकेन ङीप्-प्रत्यययोगे वरी-इति पदं निष्पन्नं जातम् । पदस्यैतस्य बहुवचने वर्यः-इत्येवं भवति ।

<u>तत्त्वार्थसमीक्षणम्</u> – इन्द्रेण वृतत्वाद् जलस्य वरणीयत्वम् । जलस्य वरणीयत्वं वैदिके लौकिके च प्रसिद्धम् । तस्योदकस्य धारकत्वात् नदीनां वर्यस्त्वं प्रसिद्धम् । अपि च, नदी तस्याः जलेन प्राणिनः सेवते, तत्परिपालनाय तत्परिपोषणाय च नदी तस्याः जलं प्रददाति इति कृत्वा तस्याः नद्याः वर्यस्त्वं प्रतिपादितम् ।

<u>उर्व्यः</u> - निघण्टूक्तेषु नदीवाचकेषु उर्व्य एव चतुर्विंशतितमपदम् ।[116] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

<u>रूपार्थसमीक्षणम्</u>  – धातुपाठे अदादीगणीये आच्छादनार्थकेन[117] ऊर्णु-धातुना सह *महति ह्रस्वश्च* – इति सूत्रेण[118] उ-प्रत्ययो णलोपो ह्रस्वश्च कृत्वा उरुः- इति पदं निष्पन्नं जातम् । *वोतोगुणवचनात्* – इति सूत्रेण[119] ङीष्-इति प्रत्ययेन उर्वी-इति पदं निष्पद्यते ।

<u>तत्त्वार्थसमीक्षणम्</u>  -  ऊर्णोति आच्छादयतीति उर्वी ।[120] अधिकवर्षणत्वात् महत्योः नद्यः स्वोदकेन विस्तीर्णं भूमिमाच्छादयन्तीति[121] कृत्वा नदीनाम् उर्व्यस्त्वं प्रसिद्धं प्रतिपादितञ्च ।

<u>इरावत्यः</u> – निघण्टूक्तेषु नदीवाचकेषु इरावत्यः एव पञ्चविंशतितमपदम् ।[122] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः

<u>रूपार्थसमीक्षणम्</u> – धातुपाठे अदादिगणे गत्यर्थकात् इ-धातुना[123] सह र-प्रत्यययोगेन, टाप्-प्रत्यययोगेन, निपातनात् गुणाभावे इरा-इति पदं निष्पन्नं जातम् । इरा-शब्देन सह मतुप्-प्रत्ययेन, म-कारस्य व-कारेण इरावती-इति रूपं सिद्धम् ।

<u>तत्त्वार्थसमीक्षणम्</u> - इरा नाम जलम् ।[124] अतएव  नदी खलु जलवती इरावती इति कृत्वा तस्याः नद्याः इरावतीत्वं प्रसिद्धम् ।

<u>पार्वत्यः</u> – निघण्टूक्तेषु नदीवाचकेषु पार्वत्य एव षट्विंशतितमपदम् ।[125] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः–

<u>रूपार्थसमीक्षणम्</u> - पर्वति पूरयतीति पूरणार्थकेन पर्व-धातुना[126] सह औणादिकेन अतच्-प्रत्यये[127] कृते सति पर्वत-इति रूपं निष्पन्नम् । पर्वतो हिमाचलस्तस्य तदधिष्ठातृदेवस्येति भाव अपत्यमिति अण्-प्रत्यये पार्वतः इति  स्थितम् । तदनन्तरं ङीप्-प्रत्ययेन पार्वती, तस्य शब्दस्य बहुवचने पार्वत्यः-इति रूपं निष्पन्नं जातम् ।

<u>तत्त्वार्थसमीक्षणम्</u> – अतिवर्षणादनन्तरं नदी पर्वति पूरयति जलेन भूमिं इति कृत्वा पार्वत्यः – शब्दस्य नदीवाचकत्वं प्रतिपादितम् ।

<u>स्रवन्त्यः</u> – निघण्टूक्तेषु नदीवाचकेषु स्रवन्त्यः एव सप्तविंशतितमपदम् ।[128] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

<u>रूपार्थसमीक्षणम्</u> – भ्वादिगणे गत्यर्थकात् स्रु-धातोः शतृ-प्रत्यययोगेन, ङीप्-प्रत्यययोगेन च स्रवन्ती-इति पदं  निष्पन्नं जातम् । स्रवन्ती नाम नदी इत्यमरकोशः ।[129]

---

[112] निघ. – 1.13.23
[113] वृञ् वरणे – स्वा.उ.धा.पा. - 1254
[114] अच इः (उ. – 4.138) 578
[115] बह्वाऽदिभ्यश्च (पा. – 4.1.45)
[116] निघ. – 1.13.24
[117] ऊर्णुङ् आच्छादने – अ.उ.धा.पा. - 1039
[118] उ. – 1.31 (31)
[119] पा. – 4.1.44
[120] निघ. – 1.1.10
[121] दे.य. – महत्योः नद्यः, छादयित्र्यो वा भूमेः स्वेनोदकेन (निघ. – 1.13.24)
[122] निघ. – 1.13.25
[123] इण् गतौ – अ.पर.धा.पा. - 1046
[124] अम. – 3.3.536 (इरा भूवाक्सुराप्सु...)
[125] निघ. – 1.13.26
[126] पर्व पूरणे – भ्वा.पर.धा.पा. - 577
[127] भृमृशीतृचरित्... (उ. – 1.7) 7
[128] निघ. – 1.13.27
[129] अम. – 1.10.30

तत्त्वार्थसमीक्षणम् – नदी एव सर्वदा गमनस्वभावयुक्ता ।[130] अतएव गत्यर्थकात् स्रु-धातु-निष्पन्नस्य स्रवन्ती-इति पदस्य नदीवाचकत्वं प्रतिपादितम् सर्वदा गमनशीलत्वात् ।

ऊर्जस्वत्यः - निघण्टूक्तेषु नदीवाचकेषु ऊर्जस्वत्य एव अष्टाविंशतितमपदम् ।[131] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

रूपार्थसमीक्षणम् – धातुपाठे चुरादिगणीये परस्मैपदिना बलवाचकेन ऊर्ज-धातुना[132] सह औणादिकेन असुन्-प्रत्यय-योगेन[133] पयः-इति निष्पद्यते । ऊर्जयतीत्यूर्जो वलं तेन तद्वत्यः । *अस्मायामेधास्रजो विनिः*[134] इति सूत्रेण मत्यर्थे विनि-प्रत्ययः । *बहुलं छन्दसि* इति सूत्रेण[135] मतुप्-प्रत्ययः । *तसौ मत्वर्थे* इति सूत्रेण[136] तकारान्तत्वात् ऊर्जस्वत्-इति पदस्य भ-संज्ञा । ऊर्जस्वत् – इत्यस्य स्त्रीलिङ्गे ऊर्जस्वती, प्रथमायाः बहुवचने ऊर्जस्वत्यः इति ।

तत्त्वार्थसमीक्षणम् – ऊर्जो नाम बलम् । नदी एव वेगवती बलवती चेति । बलवत्यो नद्यः प्रवाहकाले स्ववेगेन तटस्थितान् स्थिरान् वृक्षादीन् प्रवाहयन्ति हरन्ति[137] इति तासां नदीनां बलवन्तत्वम् ऊर्जस्वत्यस्त्वम् ।

पयस्वत्यः - निघण्टूक्तेषु नदीवाचकेषु पयस्वत्य एव ऊनत्रिंशत्तमपदम् ।[138] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

रूपार्थसमीक्षणम् – धातुपाठे भ्वादिगणे पानार्थकात् पा-धातोः[139] औणादिकेन असुन्-प्रत्यय-योगेन[140] पयः-इति निष्पद्यते । पीयत इति पयः । *अस्मायामेधास्रजो विनिः* – इति सूत्रेण[141] मतुप्-प्रत्ययः, *बहुलं छन्दसि* – इति सूत्रेण[142] मकारस्य वकारत्वम्, *उगितश्च*-इति सूत्रेण[143] ङीप्-प्रत्ययः । *तसौ मत्वर्थे* – इति सूत्रेण[144] भसंज्ञाविधानात् रुत्वं न भवति । अतएव पीयते इति रूपं निष्पन्नम् ।

तत्त्वार्थसमीक्षणम् – पयोऽस्या अस्तीति पयस्वती । नदी खलु पयःस्वती । पयःपानेन तथा पयःग्रहणेन न केवलं प्राणिनः अपि तु वृक्षा अपि वर्धन्ते इति पयः । उदकं तद्वत्यः[145] इति पयस्वत्यः ।

सरस्वत्यः - निघण्टूक्तेषु नदीवाचकेषु सरस्वत्य एव त्रिंशत्तमपदम् ।[146] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः–

रूपार्थसमीक्षणम् - स्त्रीलिङ्गवाचकः शब्दोऽयं सरो नीरं तद्वत् रसो वास्त्यस्या इति विग्रहे सरस्-शब्देन सह मतुप्-प्रत्यययोगेन, मकारस्य वकारकृते सति निष्पन्नो जातः । सरशब्दस्य गतिवाचकत्वं प्रसिद्धम् । शब्दोऽयं धातुपाठे दशगणेषु भ्वादिगणान्तर्गतेन सृ[147]-धातुना सह औणादिकासुन्[148]-प्रत्ययेन निष्पन्नः । सरति स्रियते गच्छतीति वा सरः ।[149] सरो नाम जलम् ।[150] जलस्य गतिवाचकत्वं सर्वैव सर्वत्रैव प्रसिद्धम् ।

तत्त्वार्थसमीक्षणम् – वैदिकसाहित्ये सरस्वती-शब्दो द्विविधार्थबोधकः । शब्देनानेन देवी नदी चावगम्येते । *इयं शुष्मेभिर्बिसखा इवारुजत्*[151] इति मन्त्रे सरस्वती नदीरूपा । मन्त्रेऽस्मिन् ऊर्मिभिः पारावतघ्नीं इति शब्दद्वयं तस्याः सरस्वत्याः नदीरूपत्वं सूचयति । सर-शब्दस्यार्थो जलमिति

---

[130] दे.य. – सर्वदा गमनस्वभावः (निघ. – 1.13.27)
[131] निघ. – 1.13.28
[132] ऊर्ज बलप्राणनयोः – चु.उ.धा.पा. - 1549
[133] सर्वधातुभ्योऽसुन् (उ. – 1.188) 628
[134] पा. – 5.2.121
[135] पा. – 5.2.122
[136] पा. – 1.4.19
[137] दे.य. – निघ. – 1.13.28
[138] निघ. – 1.13.29
[139] पा पाने – भ्वा.पर.धा.पा. - 925
[140] सर्वधातुभ्योऽसुन् (उ. – 1.188) 628
[141] पा. – 5.2.121
[142] पा. – 5.2.122
[143] पा. – 4.1.6
[144] पा. – 1.4.19
[145] दे.य. – निघ. – 1.13.29
[146] निघ. – 1.13.30

1. [147] सृ गतौ – भ्वा.पर.धा.पा. - 935
2. [148] सर्वधातुभ्योऽसुन् (उ. – 4.188) 628
3. [149] सरति स्रियते वा सरः (निघ. – 1.12.38)
4. [150] सर इत्युदकनाम सर्तेः (नि. – 9.26.3)
5. **[151] ऋ. - 6.61.2**

पूर्वोल्लिखितः। नदीषु जलमस्तीति कृत्वा जलस्य गतिवाचकत्वं, जलस्थिताभिः ऊर्मिभिः पारावतघ्नत्वमपि सर्वैर्विज्ञातम्। अत एव सर उदकम्। तदभीक्ष्णं सरति गच्छतीति, तेन विशिष्टेन सरसा जलेन तद्वती सरस्वतीति। सरसत्वात् उदकवत्वात् सरस्वती-इति शब्दो नदीवाचकेषु पठित इति आशयः।

<u>तरस्वत्यः</u> – निघण्टूक्तेषु नदीवाचकेषु तरस्वत्य एव एकत्रिंशत्तमपदम्।[152] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

<u>रूपार्थसमीक्षणम्</u> - धातुपाठे भ्वादिगणे प्लवन-सन्तरण-वाचकेन तॄ-धातुना[153] सह औणादिकेन असुन्-प्रत्यय-योगेन[154] तरः-इति निष्पद्यते। तरो नाम बलम्।[155] तरो बलं वेगो वा अस्ति अस्य इति मतुप्, मस्य व-इति कृत्वा तरस्वत्, स्त्रीलिङ्गे तरस्वती, प्रथमायाः बहुवचने तरस्वत्यः – इति रूपं निष्पन्नं जातम्।

<u>तत्त्वार्थसमीक्षणम्</u> – तरन्ति अनेन अपदमिति तरो बलं तद्वत्यः[156] इति। नद्यः बलेन वेगेन वा प्रवाहकाले वर्जं प्रवाहयन्तीति तासां नदीनां तरस्वत्यस्त्वमिति।

<u>हरस्वत्यः</u> – निघण्टूक्तेषु नदीवाचकेषु हरस्वत्य एव द्वात्रिंशत्तमपदम्।[157] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

<u>रूपार्थसमीक्षमम्</u> - धातुपाठे भ्वादिगणे हरणार्थकात् हृञ्-धातुना[158] सह औणादिकेन असुन्-प्रत्यय-योगेन[159] हर-इति निष्पद्यते। हरः – इत्येतदनेकार्थम्। तद्यथा – *ह्रियतो प्राणिभिः, हरति वा स्नेहं दशयाभ्यन्तरस्थया, हरति वा तम इति हर इत्युच्यते, उदकं ह्रियते प्राणिभिर्जीविनाय इति हर इत्युच्यते* इति।[160]

<u>तत्त्वार्थसमीक्षणम्</u> – जलं खलु प्राणिभिः तज्जीवनाय तदुपभोगाय ह्रियते इति। नदी एव जलधारका। अतएव जलधारकत्वात् तज्जलस्य हरणत्वात् नदी एव हरस्वती-शब्देनोच्यते। हरस्वती-इत्यस्य शब्दस्य बहुवचने हरस्वत्यः इति रूपं जातम्।

<u>रोधस्वत्यः</u> – निघण्टूक्तेषु नदीवाचकेषु रोधस्वत्य एव त्रयस्त्रिंशत्तमपदम्।[161] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

<u>रूपार्थसमीक्षणम्</u> – धातुपाठे रुधादिगणे रुद्ध्यर्थकात् रुध्-धातुना[162] सह औणादिकेन असुन्-प्रत्यय-योगेन[163] रोधः-इति निष्पद्यते। रोधसा तीरेण, तद्वत्यः[164] इति।

<u>तत्त्वार्थसमीक्षणम्</u> – रुणद्धि स्रोतः इति रोधः कूलम्। रोधः कूलं निरुणद्धि स्रोतः इति। नदीजलं तथा नदी तीरेण कूलेन रुणद्धि वाधाप्राप्तं भवति इति कृत्वा रोधस्वती नाम नदी, तस्याः बहुवचने रोधस्वत्यः इति।

<u>भास्वत्यः</u> – निघण्टूक्तेषु नदीवाचकेषु भास्वत्य एव चतुस्त्रिंशत्तमपदम्।[165] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

<u>रूपार्थसमीक्षणम्</u> – अदादिगणे दीप्त्यर्थकात् भा-धातुना[166] सह क्विप्प्रत्यय-योगेन भास-शब्दो निष्पद्यते। भास्वती-शब्दो निष्पद्यते। भासा, तद्वती भास्वती। *तसौ मत्वर्थे* – इति सूत्रेण[167] भसंज्ञाविधानात् रुत्वं न भवति। तस्य बहुवचने भास्वत्यः – इति रूपं सिद्धम्। भात्येव स्वया दीप्त्या इति भास्वती।

[152] निघ. – 1.13.31
[153] तॄ प्लवनतरणयोः – भ्वा.पर.धा.पा. - 969
[154] सर्वधातुभ्योऽसुन् (उ. – 1.188) 628
[155] शब्दकल्पद्रुमः
[156] दे.य. – 1.13.31
[157] निघ. – 1.13.32
[158] हृञ् हरणे – भ्वा.उ.धा.पा. – 899
[159] सर्वधातुभ्योऽसुन् (उ. – 1.188) 628
[160] नि. – 4.3.19
[161] निघ. – 1.13.33
[162] रुधिर् आवरणे – रु.उ.धा.पा. - 1438
[163] सर्वधातुभ्योऽसुन् (उ. – 1.188) 628
[164] दे.य. – निघ. – 1.13.33
[165] निघ. – 1.13.34
[166] भासृ दीप्तौ – भ्वा.आ. धा.पा. - 624
[167] पा. – 1.4.19

तत्त्वार्थसमीक्षणम् – भा नाम दीप्तिः,[168] तद्वत्यः दीप्तिमत्यः[169] भास्वत्यः इति हि नद्यः । उदकस्य शुक्लवर्णत्वात्तस्य नित्यभास्वरत्वं प्रकाशितम् । तस्योदकस्य आधारभूता नदी एव भाति दीप्यते इति कृत्वा भास्वत्यः – इति पदेन नद्यः अवगम्यन्ते ।

अजिराः - निघण्टूक्तेषु नदीवाचकेषु अजिरा एव पञ्चत्रिंशत्तमपदम् ।[170] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

रूपार्थसमीक्षणम् - भ्वादिगणे गमनार्थकेन परस्मैपदिना अज-धातुना[171] सह औणादिक-किरच्-प्रत्यय-योगेन[172] अजिरा-इति निष्पद्यते ।

तत्त्वार्थसमीक्षणम् – अजन्ति गच्छन्ति क्षिप्यन्ते प्रेर्यन्ते नावः इति अजिरा ।[173] नद्यः गच्छन्ति, अजन्ति इति यावत् । यद्वा, अजिरम् – इति क्षिप्रनाम[174], अजिराः शीघ्रगाः[175] इति । नावोऽपि ताभिः नदीभिः क्षिप्रेण प्रेरयिताः इति तासां नदीनां अजिरत्वम् इति ।

मातरः - निघण्टूक्तेषु नदीवाचकेषु मातर एव षट्त्रिंशत्तमपदम् ।[176] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

रूपार्थसमीक्षणम् - अदादिगणे परस्मैपदिना मा-धातुना[177] सह तृन्-प्रत्यय-योगेन[178] मातृ-इति निष्पद्यते । प्रातिपदिकस्यास्य प्रथमायाः बहुवचने मातरः – इति स्थितम् । न षट्स्वस्रादिभ्यः – इति सूत्रेण[179] षट्संज्ञाकेभ्यः स्वस्रादिभ्यश्च प्रातिपदिकेभ्यो स्त्रीप्रत्ययो न भवतीति कृत्वा अत्र ङीप् प्रतिषेधो विहितः ।

तत्त्वार्थसमीक्षणम् – प्रजापतिना सा निर्मीयते । आसृष्टेः परमब्रह्मकैवासीत् । तस्मादेव जगदुत्पत्तिः श्रीमद्भगवद्गीतायामुक्तम् - ***अहं कृत्स्नस्य जगतः प्रभवः...***[180] , ***मयि सर्वमिदं प्रोतं ...***[181] इत्यादयः । अतएव जलं तदाधारभूता नदी च तस्मात्परब्रह्मणरुत्पन्ना । सा नदी एव मातृवल्लोकस्य रक्षिका, यतो हि नदीमातृको देशोऽयमिति कथनं सुविदितम् । अतएव प्रजापतिना निर्मितत्वात्, जगतो मातृक्ल्पत्वाच्च नद्याः मातृत्वं प्रतिपादितमिति ।

नद्यः – निघण्टूक्तेषु नदीवाचकेषु नद्य एवान्तिमपदम् तथा सप्तत्रिंशत्तमपदम् ।[182] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

रूपार्थसमीक्षणम् - भ्वादिगणे शब्दार्थवाचकेन परस्मैपदिना नद्-धातुना[183] सह अच्-प्रत्यय-योगेन[184] नद-इति निष्पद्यते । ततः स्त्रीलिङ्गवाचकेन ङीप्-प्रत्यययोगेन[185] नदी-इति निष्पद्यते । प्रातिपदिकस्यास्य प्रथमायाः बहुवचने नद्यः – इति स्थितम् ।

तत्त्वार्थसमीक्षणम् – नदन्ति शब्दन्ति इति नद्यः ।[186] प्रवहनकाले नदी सगर्जनं प्रवहतीति तस्याः नद्याः नद्यस्त्वं प्रतिपादितम् ।

उपसंहारः - नैवास्माकमविदितं यद्वै वेदानां गूढार्थत्वात्तद्बौधनाय वेदार्थकुशलैराचार्यैः सुबोधानि शिक्षादीनि षड्वेदाङ्गानि प्रवर्तितानि विद्यास्थानरूपेण । प्रधानञ्चेदं वेदाङ्गं वेदपुरुषस्यार्थावगमनाय । तत्र खलु शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति षडङ्गेष्वेतेषु निरुक्तं नाम ह्येकं वेदाङ्गमिति सर्वैरेव ज्ञायते । भगवता यास्काचार्येण नैघण्टुक-नैगम-दैवतकाण्डरूपेण त्रिविधं काण्डं समाम्नायं निरुक्तग्रन्थस्यास्य । तत्र निघण्टु एव वैदिककोशो ग्रन्थः । शब्दराशिरभिधीयते कोशशब्देन । तेन खलु प्रतीयते वैदिकशब्दराशिक्रमः । गवादिगेवपत्न्यन्तरेव चत्वारिंशच्छतत्रयाधिकसहस्रशब्दराशिरिह विधृतः । तेन हि बोध्यते निघण्टुस्तावद्विशालः कोशग्रन्थः । अत्र खलु वैदिकशब्दानां समाम्नायो दृश्यते । तेषु वैदिकशब्देषु अस्माभिः नदी-शब्दः गृहीतः । सप्तत्रिंशत्संख्यक-नदीवाचकानां शब्दानां रूप-तत्त्वार्थसमीक्षणं कृतमस्माभिः यथामति अस्मिन्नेव गवेषणापत्रे।

नदीमातृको देशोऽस्माकमिदं भारतवर्षम् । अपि तु जलमेवास्माकं जीवनम् । तदर्थं निघण्टुसमुल्लिखितानां मातृकल्पानां नदीवाचकशब्दानां तत्सह जलवाचकशब्दानामपि रूपतत्त्वगतार्थसमीक्षणमेवास्य गवेषणानिबन्धस्य मुख्योद्देशोऽस्ति । निरुक्तमाश्रित्यैव विविधानां ग्रन्थानां संग्रथनं संरचनञ्च सुधिजनसमाजे तथा पाठकसमाजे सुप्रचलितमिति दृश्यत इति पूर्वे कथितम् । परन्तु अस्माकमिदं शोधपत्रसदृशं किमपि शोधपत्रमधुना पाठकसमाजे

168 अम. – 1.4.34
169 दे.य. – 1.13.34
170 निघ. – 1.13.35
171 अज गतिक्षेपणयोः – भ्वा.पर.धा.पा. - 230
172 अजिर-शिशिर-शिथिल... (उ. – 1.53) 53
173 दे.य. – निघ. – 1.13.35
174 निघ. – 2.15
175 दे.य. – निघ. – 1.13.35
176 निघ. – 1.13.36
177 मा माने – अ.पर.धा.पा. - 1062
178 तृनतृचौ शंसिक्षदादिभ्यः... (उ. – 2.93) 250
179 पा. – 4.1.10
180 गी. – 7.6
181 गी. – 7.7
182 निघ. – 1.13.37
183 नद अव्यक्ते शब्दे – भ्वा.पर.धा.पा. - 54
184 पचाद्यच् – (पा. – 3.1.134)
185 टिड्ढाणञ्द्वयसज्... (पा. – 4.1.15)
186 दे.य. – नदन्ति नद्यः (निघ. – 1.13.37)

नोपलभ्यत इति कृत्वाऽत्र विषयनिर्वाचने मम क्षोदिष्ठः प्रयास एवेति । परन्तु कथं तावन्नदीशब्दः ? सुविदितं सर्वैर्यत् - नदीमातृकोऽयमस्माकं भारतवर्षो देशः । परोपकाराय हि सा वहन्ति प्रवहन्ति । तदभावे परोक्षतया जलाभावे मनुष्यजीवनमस्तित्वविहीनमिति प्रतिपादितम् । स्मर्यते केचन प्रसिद्धश्लोकाः–

छायां प्रकुर्वन्ति नमन्ति पुष्पैः फलानि यच्छन्ति तटद्रुमा ये ।
उन्मुल्य तानेव नदी प्रयाति तरङ्गिणां क्व प्रतिपन्नमस्ति ।। इति । पुनरपि,
यास्याति जलधरसमयस्तव च समृद्धिर्लघीयसी भविती ।
तटिनि तटद्रुमपातनपातकमेकं चिरस्थायि ।। इत्यादयः ।

## 4. शब्दसंक्षेपसूची

अ.उ.धा.पा. – अदादिगणीय-उभयपदी-धातुपाठः
अ.शु. – अभिज्ञानशकुन्तलम्
अ./अदा.पर.धा.पा. – अदादिदणीय-परस्मैपदी-धातुपाठः
अम. – अमरकोशः
उ. – उणादिसूत्रम्
ऋ. – ऋग्वेदः
क्र्या.उ.धा.पा. – क्रादिगणीय-उभयपदी-धातुपाठः
क्र्या.पर.धा.पा. – क्र्यादिगणीय-परस्मैपदी-धातुपाठः
गी. – श्रीमद्भगवद्गीता
चु.उ.धा.पा. – चुरादिगणीय-उभयपदी-धातुपाठः
त./तन.पर.धा.पा. – तनादिगणीय-परस्मैपदी-धातुपाठः
तन.उ.धा.पा. – तनादिगणीय-उभयपदी-धातुपाठः
तु.पर.धा.पा. – तुदादिगणीय-परस्मैपदी-धातुपाठः
दि.पर.धा.पा. – दिवादिगणीय-परस्मैपदी-धातुपाठः
दे.य. – देवयज्वा
नाट्य. – नाट्यशास्त्रम्
नि. – निरुक्तम्
निघ. – निघण्टुः
पा. – पाणिनिः
पा.शि. – पाणिनीयशिक्षा
भ्वा.आ.धा.पा. – भ्वादिगणीय-आत्मनेपदी-धातुपाठः
भ्वा.उ.धा.पा. – भ्वादिगणीय-उभयपदी-धातुपाठः
भ्वा.पर.धा.पा. – भ्वादिगणीय-परस्मैपदी-धातुपाठः
मनु. – मनुस्मृतिः
रु.उ.धा.पा. – रुधादिगणीय-परस्मैपदी-धातुपाठः
सा.भा. – सायणभाष्यम्
स्वा.पर.धा.पा. – स्वादिगणीय-परस्मैपदी-धातुपाठः

## ग्रन्थपञ्जी


अमरकोषः अमरार्थचन्द्रिका वा । सम्पा. – गुरुनाथ-भट्टाचार्यः । कोलकाता : संस्कृत-पुस्तक-भाण्डारः, 1417 वङ्गाब्दः ।

अष्टाध्यायी । चन्द्रलेखा हिन्दीव्याख्यायुताऽनेकोपयोगिविषयैरूपबृंहिता सूत्रपाठ-सूत्रवार्तिकोदाहरणानां सूच्या चान्विता । मदर्षि-पाणिनिः । व्याख्याकारः- ईश्वरचन्द्रः । प्रथम-द्वितीयभागः, व्रजजीवन प्राच्यभारती ग्रन्थमाला 103, दिल्ली : चोखम्बा संस्कृत प्रतिष्ठान, 2004.

अष्टाध्यायी । सम्पा. – तपनशङ्कर-भट्टाचार्यः । कोलकाता : संस्कृत-वुक-डिपो, 2004.

धातुप्रदीपः श्रीशचन्द्रचक्रवर्तिकृत-धातुप्रदीपविवरणसहितः । मैत्रेयरक्षितरचितः । सम्पा. – करुणासिन्धुदासः । कोलकाता : संस्कृत पुस्तक भाण्डार, 2003.

निरुक्तम्, यास्कप्रणीतम् । सम्पा. – अमरेश्वरठाकुरः । कोलकाता : कोलकाता विश्वविद्यालयः, पुनर्मुद्रितसंस्करणम्, 2003.

निरुक्तम्, यास्कप्रणीतम् (प्रथम-द्वितीयाध्यायः) । सम्पा. – उमाशङ्करशास्त्री । विद्याभवन संस्कृतग्रन्थमाला 57 । वाराणसी : चौखम्बा विद्याभवन, 2017.

निरुक्तम् (निघण्टु) । आचार्य-यास्कः । सम्पा. – मनसुखराय मोर । श्रीदेवराजयज्वकृतटीकासनाथीकृतं प्रथमो भागः, कोलकाता, 1952.

निरुक्तम् (निघण्टु) आचार्य-यास्कप्रणीतम्, (श्रीदेवराजयज्वकृत निर्वचन नाम टीका सहितम्) । सम्पा. – देवराजयज्वः । प्रथमो भागः । गुरुमण्डलग्रन्थमाला – 10. कोलकाता : क्लाइव रो, 1952.

वैदिक-निघण्टु-सङ्ग्रहः । सम्पा. – धर्मवीरो विद्यावारिधिः । प्राच्यविद्यानुसन्धानग्रन्थामाला प्रथमं प्रसूनम्, बहालगढ, 1989.

वैयाकरणसिद्धान्तकौमुदी, भट्टोजीदीक्षितविरचिता । सम्पा.- रामचन्द्र झा । व्याख्याकारः- सत्यनारायण शास्त्री खण्डुडी । इन्दुमती-संस्कृत-हिन्दीव्याख्या-विविधपरिशिष्ट टिप्पणी (नोटस्) सहिता (ण्यन्तादि-समाप्त्यन्तो भागः), पुनर्मुद्रणम्, कृष्णदास संस्कृत सीरीज् 13, वाराणसीः कृष्णदासअकादमी, 2002.

वैदिक-पदानुक्रम-कोषः । सम्पा.- विश्वबन्धु । संहिताभागः, शान्तकुटीवैदिकग्रन्थमाला, होशियारपुरः विश्वेश्वरानन्द-वैदिक-शोध-संस्थान, प्र.भागः (अ)-द्वि.स., 1976; द्वि.भागः (अ-घ)-द्वि.स., 1985; तृ.भागः (च-न)-1956; च.भागः (प-स)-1959; प.भागः (व-स)- 1962.

Indian Etymologists and Their Etymologies. Dipak Bhattacharya. Kolkata: School of Vedic Studies, Rabindra Bharati University, 2002.

The Vedic Etymology, A Critical evaluation of the Science of Etymology as found in Vedic literature. Fatah Singh. The Chaukhamba Surbharti Studies 6, rpt. Varanasi: Chaukhamba Surbharti Prakashan, 2008.